श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवामनपुराणे वामनप्राद‍ुर्भावे

# ॥ श्रीगजेन्द्रमोक्षणम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीगजेन्द्रमोक्षणम् ॥

नारद उवाच

याञ्जप्यान्भगवद्भक्त्या प्रह्लादो दानवोऽजपत्।
गजेन्द्रमोक्षणादींस्त्वं चतुरस्तान् वदस्व मे ॥ 1 ॥

पुलस्त्य उवाच

शृणुष्व कथयिष्यामि जप्यानेतांस्तपोधन।
दुःस्वप्ननाशो भवति यैरुक्तैः संस्मृतैः श्रुतैः ॥ 2 ॥

गजेन्द्रमोक्षणं त्वादौ शृणु त्वं तदनन्तरम्।
सारस्वतौ ततः पुण्यौ पापप्रशमनौ स्तवौ ॥ 3 ॥

सर्वरत्नमयः श्रीमांस्त्रिकूटो नाम पर्वतः।
सुतः पर्वतराजस्य सुमेरोर्भास्करद्युतेः ॥ 4 ॥

क्षीरोदजलवीच्यग्रैर्धौतामलशिलातलः।
उत्थितः सागरं भित्त्वा देवर्षिगणसेवितः ॥ 5 ॥

अप्सरोभिः परिवृतः श्रीमान्प्रस्रवणाकुलः।
गन्धर्वैः किन्नरैर्यक्षैः सिद्धचारणगुह्यकैः ॥ 6 ॥

विद्याधरैः सपत्नीकैः संयतैश्च तपस्विभिः।
वृकद्वीपिगजेन्द्रैश्च धृतगात्रो विराजते ॥ 7 ॥

पुन्नागैः कर्णिकारैश्च बिल्वामलकपाटलैः।
चूतनीपकदम्बैश्च चन्दनागुरुचम्पकैः ॥ 8 ॥

शालैस्तालैस्तमालैश्च सरलार्जुनपर्पटैः।
यथान्यैर्विविधैर्वृक्षैः सर्वतः समलङ्कृतः॥ **9** ॥

नाना धात्वङ्कितैः शृङ्गैः प्रस्रवद्भिः समन्ततः।
शोभितो रुचिरप्रस्थैस्त्रिभिर्विस्तीर्णसानुभिः॥ **10** ॥

मृगैः शाखामृगैः सिंहैर्मातङ्गैश्च सदामदैः।
जीवं जीवकसंघुष्टैश्चकोरशिखिनादितैः॥ **11** ॥

तस्यैकं काञ्चनं शृङ्गं सेवते यद्दिवाकरः।
नानापुण्यसमाकीर्णं नानागन्धादिवासितम्॥ **12** ॥

द्वितीयं राजतं शृङ्गं सेवते यन्निशाकरः।
पाण्डुराम्बुदसङ्काशं तथा रत्नचयोपमम्॥ **13** ॥

वज्रेन्द्रनीलवैडूर्यतेजोभिर्भासयन्दिशः।
तृतीयं ब्रह्मसदनं प्रहृष्टं शृङ्गमुत्तमम्॥ **14** ॥

न तत्कृतघ्नाः पश्यन्ति नृशंसा नैव राक्षसाः।
नातप्ततपसो लोके ये च पापकृतो जनाः॥ **15** ॥

तस्य सानुमतः पृष्ठे सरः काञ्चनपङ्कजम्।
कारण्डवसमाकीर्णं राजहंसोपशोभितम्॥ **16** ॥

कुमुदोत्पलकह्लारैः पुण्डरीकैश्च शोभितम्।
कमलैः शतपत्रैश्च काञ्चनैः समलङ्कृतम्॥ **17** ॥

पत्रैर्मरकतप्रख्यैः पुष्पैः काञ्चनसन्निभैः।
गुल्मैः कीचकवेणूनां समन्तात्परिवेष्टितम्॥ **18** ॥

तस्मिन्सरसि दुष्टात्मा निगूढोऽन्तर्जलेशयः।
आसीद् ग्राहो गजेन्द्राणां दुराधर्षो महाबलः॥ **19** ॥

अथ दन्तोज्ज्वलवपुः कदाचिद्गजयूथपः।
मदस्रावी जलाकाङ्क्षी पादचारीव पर्वतः॥ 20 ॥

वासयन्मदगन्धेन गिरिमैरावतोपमः।
स गजोऽञ्जनसङ्काशो मदाघूर्णितलोचनः॥ 21 ॥

तृषितः स्नातुकामोऽसाववतीर्णश्च तज्जलम्।
सलीलः पङ्कजवने यूथमध्यगतस्त्वरन्॥ 22 ॥

गृहीतस्तेन रौद्रेण ग्राहेणाव्यक्तमूर्तिना।
पश्यन्तीनां करेणूनां क्रोशन्तीनां च दारुणम्॥ 23 ॥

ह्रियते पङ्कजवने ग्राहेणातिबलीयसा।
गज आकर्षते तीरं ग्राह आकर्षते जलम्॥ 24 ॥

तयोर्दिव्यं महायुद्धं जातं वर्षसहस्रकम्।
वारुणैः संयुतः पाशैर्निष्प्रयत्नगतिः कृतः॥ 25 ॥

वेष्ट्यमानः सुघोरैस्तु पाशैर्नागो दृढैस्तथा।
विस्फूर्य च यथाशक्ति विक्रोशश्च महारवान्॥ 26 ॥

व्यथितः सन्निरुच्छ्वासो गृहीतो घोरकर्मणा।
परमामापदं प्राप्य मनसाचिन्तयद्धरिम्॥ 27 ॥

स तु नागवरः श्रीमान्नारायणपरायणः।
तमेव शरणं देवं गतः सर्वात्मना तदा॥ 28 ॥

एकात्मानुगृहीतात्मा विशुद्धेनान्तरात्मना।
जन्मजन्मान्तराभ्यासाद्भक्तिमान्गरुडध्वजे॥ 29 ॥

आद्यं देवं महादेवं पूजयामास केशवम्।
मथितामृतफेनाभं शङ्खचक्रगदाधरम्॥ 30 ॥

सहस्रशुभनामानमादिदेवमजं विभुम्।
प्रगृह्य पुष्कराग्रेण काञ्चनं कमलोत्तमम्।
आपद्विमोक्षमन्विच्छन्गजः स्तोत्रमुदीरयत्॥ **31** ॥

गजेन्द्र उवाच
ओं नमो मूलप्रकृतये अजिताय महात्मने।
अनाश्रिताय देवाय निःस्पृहाय नमोऽस्तु ते॥ **32** ॥

नम आद्याय वामाय आर्षायादिप्रवर्तिने।
अनन्तराय चैकाय अव्यक्ताय नमो नमः॥ **33** ॥

नमो गुह्याय गूढाय गुणाय गुणवर्तिने।
अतर्क्यायाप्रमेयाय अतुलाय नमो नमः॥ **34** ॥

नमः शिवाय शान्ताय निश्चिन्ताय यशस्विने।
सनातनाय पूर्वाय पुराणाय नमो नमः॥ **35** ॥

नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने।
नमो जगत्प्रतिष्ठाय गोविन्दाय नमो नमः॥ **36** ॥

नमोऽस्तु पद्मनाभाय साङ्ख्ययोगोद्भवाय च।
विश्वेश्वराय देवाय शिवाय हरये नमः॥ **37** ॥

नमोऽस्तु तस्मै देवाय निर्गुणाय गुणात्मने।
नारायणाय विश्वाय देवाय परमात्मने॥ **38** ॥

नमो नमः कारणवामनाय
    नारायणायामितविक्रमाय।
श्रीशार्ङ्गचक्रासिगदाधराय
    नमोऽस्तु तस्मै पुरुषोत्तमाय॥ **39** ॥

गुह्याय वेदनिलयाय महोरगाय
सिंहाय दैत्यनिधनाय चतुर्भुजाय।
ब्रह्मेन्द्ररुद्रमुनिचारणसंस्तुताय
देवोत्तमाय सकलाय नमोऽच्युताय॥ 40 ॥

नागेन्द्रभोगशयनाय च सुप्रियाय
गोक्षीरहेमशुकनीलघनोपमाय।
पीताम्बराय मधुकैटभनाशनाय
विश्वाय चारुमुकुटाय नमोऽक्षराय॥ 41 ॥

नाभिप्रजातकमलस्थचतुर्मुखाय
क्षीरोदकार्णवनिकेतयशोधराय।
नानाविचित्रकनकाङ्गदभूषणाय
सर्वेश्वराय वरदाय नमो वराय॥ 42 ॥

भक्तिप्रियाय वरदीप्तसुदर्शनाय
देवेन्द्रविघ्नशमनोद्यतपौरुषाय।
फुल्लारविन्दविमलायतलोचनाय
योगेश्वराय वरदाय नमो वराय॥ 43 ॥

ब्रह्मायनाय त्रिदशायनाय
लोकायनायात्महितायनाय।
नारायणायात्मविकाशनाय
महावराहाय नमस्करोमि॥ 44 ॥

कूटस्थमव्यक्तमचिन्त्यरूपं
नारायणं कारणमादिदेवम्।
युगान्तशेषं पुरुषं पुरातनं
तं देवदेवं शरणं प्रपद्ये॥ 45 ॥

योगेश्वरं चारुविचित्रमौलि -
    मज्ञेयमग्र्यं प्रकृतेः परस्थम्।
क्षेत्रज्ञमात्मप्रभवं वरेण्यं
    तं वासुदेवं शरणं प्रपद्ये॥ **46** ॥

अदृश्यमव्यक्तमचिन्त्यमव्ययं
    ब्रह्मर्षयो ब्रह्ममयं सनातनम्।
वदन्ति यं वै पुरुषं सनातनं
    तं देवगुह्यं शरणं प्रपद्ये॥ **47** ॥

यदक्षरं ब्रह्म वदन्ति सर्वगं
    निशम्य यं मृत्युमुखात्प्रमुच्यते।
तमीश्वरं तृप्तमनुत्तमैर्गुणैः
    परायणं विष्णुमुपैमि शाश्वतम्॥ **48** ॥

कार्यं क्रियाकारणमप्रमेयं
    हिरण्यनाभं वरपद्मनाभम्।
महाबलं देवनिधिं सुरेशं
    व्रजामि विष्णुं शरणं जनार्दनम्॥ **49** ॥

किरीटकेयूरमहार्हनिष्कै -
    र्मण्युत्तमालङ्कृतसर्वगात्रम्।
पीताम्बरं काञ्चनभक्तिचित्रं
    मालाधरं केशवमभ्युपैमि॥ **50** ॥

नारोद्भवं वेदविदां वरिष्ठं
    योगात्मनां साङ्ख्यविदां वरिष्ठम्।
आदित्यरुद्राश्विवसुप्रभावं
    प्रभुं प्रपद्येऽच्युतमादिभूतम्॥ **51** ॥

श्रीवत्साङ्कं महादेवं देवगुह्यं मनोरमम्।
प्रपद्ये सूक्ष्ममतुलं वरेण्यमभयप्रदम्॥ **52** ॥

प्रभवं सर्वभूतानां निर्गुणं परमेश्वरम्।
प्रपद्ये मुक्तसङ्गानां यतीनां परमां गतिम्॥ **53** ॥

भगवन्तं गुणाध्यक्षमक्षरं पुष्करेक्षणम्।
शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम्॥ **54** ॥

त्रिविक्रमं त्रिलोकेशं सर्वेषां प्रपितामहम्।
योगात्मानं महात्मानं प्रपद्येऽहं जनार्दनम्॥ **55** ॥

आदिदेवमजं शम्भुं व्यक्ताव्यक्तं सनातनम्।
नारायणमणीयांसं प्रपद्ये ब्राह्मणप्रियम्॥ **56** ॥

नमो हराय देवाय नमः सर्वमहाय च।
प्रपद्ये देवदेवेशमणीयांसं तनोः सदा॥ **57** ॥

एकाय लोकतत्त्वाय परतः परमात्मने।
नमः सहस्रशिरसे अनन्ताय महात्मने॥ **58** ॥

त्वामेव शरणं दैवमृषयो वेदपारगाः।
कीर्तयन्ति च यं सर्वे ब्रह्मादीनां परायणम्॥ **59** ॥

नमस्ते पुण्डरीकाक्ष भक्तानामभयप्रद।
अब्रह्मण्य नमस्तेऽस्तु त्राहि मां शरणागतम्॥ **60** ॥

पुलस्त्य उवाच
भक्तिं तस्यानुसञ्चिन्त्य नागस्यामोघसम्भवः।
प्रीतिमानभवद्विष्णुः शङ्खचक्रगदाधरः॥ **61** ॥

सान्निध्यं कल्पयामास तस्मिन्सरसि केशवः।
गरुडस्थो जगत्स्वामी लोकाधारस्तपोधन॥ **62** ॥

ग्राहग्रस्तं गजेन्द्रं तं तं च ग्राहं जलाशयात्।
उज्जहाराप्रमेयात्मा तरसा मधुसूदनः॥ **63** ॥

जलस्थं दारयामास ग्राहं चक्रेण माधवः।
मोक्षयामास नागेन्द्रं पाशेभ्यः शरणागतम्॥ **64** ॥

एवं हि देवशापेन हूहूर्गन्धर्वसत्तमः।
ग्राहत्वमगमत्कृष्णान्मोक्षं प्राप्य दिवं गतः॥ **65** ॥

गजोऽपि विष्णुना स्पृष्टो जातो दिव्यवपुः पुमान्।
पापाद् विमुक्तौ युगपद्गजगन्धर्वसत्तमौ॥ **66** ॥

प्रीतिमान्पुण्डरीकाक्षः शरणागतवत्सलः।
अभवत्त्वथ देवेशस्ताभ्यां चैव प्रपूजितः॥ **67** ॥

इदं च भगवान्योगी गजेन्द्रं शरणागतम्।
प्रोवाच मुनिशार्दूल मधुरं मधुसूदनः॥ **68** ॥

श्रीभगवानुवाच
ये मां त्वां च सरश्चेदं ग्राहस्य च विदारणम्।
गुल्मकीचकवेणूनां रूपं मेरुसुतस्य च॥ **69** ॥

अश्वत्थं भास्करं गङ्गां नैमिषारण्यमेव च।
संस्मरिष्यन्ति मनुजाः प्रयताः स्थिरबुद्धयः॥ **70** ॥

कीर्तयिष्यन्ति भक्त्या च श्रोष्यन्ति च शुचिव्रताः।
दुःस्वप्नो नश्यते तेषां सुस्वप्नश्च भविष्यति॥ **71** ॥

मात्स्यं कौर्मं च वाराहं वामनं तार्क्ष्यमेव च।
नारसिंहं च नागेन्द्रं सृष्टिप्रलयकारकम्॥ 72 ॥

एतानि प्रातरुत्थाय संस्मरिष्यन्ति ये नराः।
सर्वपापैः प्रमुच्यन्ते पुण्यान् लोकानवाप्नुयुः॥ 73 ॥

पुलस्त्य उवाच
एवमुक्त्वा हृषीकेशो गजेन्द्रं गरुडध्वजः।
स्पर्शयामास हस्तेन गजं गन्धर्वमेव च॥ 74 ॥

ततो दिव्यवपुर्भूत्वा गजेन्द्रो मधुसूदनम्।
जगाम विष्णुं शरणं नारायणपरायणः॥ 75 ॥

ततो नारायणः श्रीमान्मोक्षयित्वा गजोत्तमम्।
पापबन्धाच्च शापाच्च ग्राहं चाद्भुतकर्मकृत्॥ 76 ॥

ऋषिभिः स्तूयमानश्च देवगुह्यपरायणैः।
ततः स भगवान्विष्णुर्दुर्विज्ञेयगतिः प्रभुः॥ 77 ॥

गजेन्द्रमोक्षणं दृष्ट्वा देवाः शक्रपुरोगमाः।
ववन्दिरे महात्मानं प्रभुं नारायणं हरिम्॥ 78 ॥

महर्षयश्चारणाश्च दृष्ट्वा गजविमोक्षणम्।
विस्मयोत्फुल्लनयनाः संस्तुवन्ति जनार्दनम्॥ 79 ॥

प्रजापतिपतिर्ब्रह्मा चक्रपाणेर्विचेष्टितम्।
गजेन्द्रमोक्षणं दृष्ट्वा इदं वचनमब्रवीत्॥ 80 ॥

य इदं शृणुयान्नित्यं प्रातरुत्थाय मानवः।
प्राप्नुयात्परमां सिद्धिं दुःस्वप्नश्च विनश्यति॥ 81 ॥

गजेन्द्रमोक्षणं पुंसां सर्वपापप्रणाशनम्।
कथितेन स्मृतेनाथ श्रुतेन च तपोधन॥ **82** ॥

एतत्पवित्रं परमं सुपुण्यं
सङ्कीर्तनीयं चरितं मुरारेः।
यस्मिन्किलोक्ते बहुपापबन्धना -
ल्लभेत मोक्षं द्विरदो नु यद्वत्॥ **83** ॥

अजं वरेण्यं वरपद्मनाभं
नारायणं ब्रह्मनिधिं सुरेशम्।
तं देवगुह्यं पुरुषं पुराणं
वन्दाम्यहं लोकपतिं वरेण्यम्॥ **84** ॥

॥ इति श्रीगजेन्द्रमोक्षणं समाप्तम्॥